# बुक-पोस्ट प्रकाशित सामग्री

## गुरुकुल पत्रिका । प्रहलाद । आर्य भट्ट

रजि० संख्या एल० १२७७

सेवा में,

2. Librarian,
Indian Institute of Technology, Bombay,
P.O. I.I.T., Powai, Bombay. Maharashtra.

**व्यवसाय प्रबन्धक**
**गुरुकुल काँगड़ी विश्वविद्यालय**
**हरिद्वार**

पेज = 8
= 21·x 17·5

विषय = ज्योतिष

नार्थेलवैरं ज्ञान योजयान वारोदया : क्तिुहरदेव

भूमिरिति यपालं वाई 8 तड्गा

(2) विषय - पूजा
- 21·5 × 15·5 × 0·3 c.m.

सनम् लक्ष्म्या श्रितं चतुर्वाहिंल क्ष्मीनारायणं

वाहिव वड् ...

(3) पेज = 10
विषय = पूजा
= 20 × 16 × 0·4 c.m.

ओं श्री गणेशाय नमः। यजुर्वेद मूल : प्रथमं

क्षतपुवचे संपूज्य महाभूतयपंतीर्थ द्याये

(5) पेज = 6
विषय = पूजा

मन्वयः कल्पते ~~यथा~~वायु वैदने विवटादेवतावायु

देवानांनेदिषृन्तमेवोपधावेति सोमिसुपम

एर्पैलवैरं शानयोज्यान वा शोध्या: किंतु हर
छेद वा का ऊ नक्ष्य कार्य: स एवं च संस्कृतो ह
र स्तप्र हरो भाजको ज्ञेय: अंशस्त्व विकृत ए
व शेषं गुणन भजनादिकं चोक्तवत् प्रागुक्त
सूत्र रीत्या यथास्थित मेव कार्यं २ तदेवोदा
हृत्य दर्शयति य इति अव्यक्तो यो राशि: प्रथ

अत्रोद्देशक: यस्त्रिघ्नस्त्रिभिरन्वित: स्व
चरणैर्भक्तस्तत: सप्तभि: स्वत्र्यंशेन।
विवर्जित: स्वगुणितो हीनो द्विपंचाशता
तन्मूलेष्टयुते हृते च दशभिर्जातं द्वयं
ब्रूहि तं राशिं वेत्सि हि चेच्चलाक्षि विमलां
बाले विलोमक्रियां ॥ ३॥०॥

मं त्रिगुण: पुनस्त्रिभि: स्वपादैर्युत: पुन: सप्त
भिर्भक्तस्तत: स्वकीयत्रिभागेन हीनो ऽथ स्वेनै
व गुणितो वर्गीकृत इत्यर्थ: ततो द्विपंचाशता।
रहित: स्यात् अथ तस्य मूले ऽष्टगुणे दशभ।
क्ते द्वयं जातं स को राशिस्तं ब्रूहि हे बाले हे चंच

२ हारेण ३ हतः ४५ एवमंशः १ स्वांशः ५ ।
परिहारेणेतराभ्यामंशाभ्यां १।३ गुणितः ३
तथांशः १ स्वांशः ३ परिहारेणान्यांशाभ्यां १।५
गुणितः ५ एवं हारा अपि मिथो निघ्नाः सर्वे जा
ताः १५ तथा च लिख्यते

| | | |
|---|---|---|
| ४५ | ३ | ५ |
| १५ | १५ | १५ |

समछेदाः त्रयाणां समछि
दामंशानां संकलने जाते $\frac{५३}{१५}$ हारस्तु समछे ।

न्यासः

| | | |
|---|---|---|
| ३ | १ | १ |

जाताः समछेदाः

| | | |
|---|---|---|
| ४५ | ३ | ५ |
| १५ | १५ | १५ |

योगे जाते $\frac{५३}{१५}$ न्यासः

| | |
|---|---|
| १ | १ |
| ६३ | १४ |

सप्तापवर्तितहाराभ्यां गुणिते च जातौ समछेदौ —

| | |
|---|---|
| २ | ९ |
| १२६ | १२६ |

द्विविभागे जाते इति भागजातिः ॥

दीकृत एक एव ग्राह्यः द्वितीयोदाहरणन्यास
माह न्यास इति

| | |
|---|---|
| १ | १ |
| ६३ | १४ |

अत्राप्यन्योन्यहाराभि
हतौ हरांशावि ति सावर्ण्ये जाते

| | |
|---|---|
| १४ | ६३ |
| ८८२ | ८८२ |

यद्यत्र हारौ सप्तभिरपवर्तितौ ९।२ ता
भ्यां हरांशौ गुणितौ

| | |
|---|---|
| १ | १ |
| ६३ | १४ |
| ९ | २ |

जातौ

| | |
|---|---|
| २ | ९ |
| १२६ | १२६ |
| ९ | २ |

अत्र

ली॰ टि॰
२५

नवभोद्विवियोजने जातं १२६ इतिभागजा
तिः॥ अथप्रभागजातौ सावर्ण्यवि
धानायाह लवाइति भाग--प्रभागेषुभा
भागानामपिप्रभागायत्र सवर्णनीयतेनोप
स्थितास्तत्रलवाअंशाः क्रमेणलवैरेवगु
णनीयाः हराश्चहरघ्नाः कार्य्याएवंकृते

अथप्रभागजातौसूत्रं लवालवघ्ना
श्चहराहरघ्नाभागप्रभागेषुसवर्णा
नेस्यात् ३ अत्रोद्देशकः द्रम्मार्द्धत्रि
लवद्वयस्यसुमतेपादत्रयंयद्भवेत्त
त्पंचांशकषोडशांशचरणः संप्रार्थि
ने दीयतेयेनवराटिकाः कतिकद
र्येणार्पितास्तेनमे ब्रूहित्वंयदिवेत्सि
वत्सगणितेजातिंप्रभागाभिधां ४

सवर्णनेस्यात् अस्याग्रेछेदघ्नेतिभविष्य
ति ३ उपजातिः ३ प्रभागजातावुदाहृति
माह द्रम्मार्द्धेति हेसुमतेप्रशस्तबुद्धे द्र
म्मस्य यदर्द्धंतस्यत्रिलवद्वयं द्वौत्रिभागौ
तस्यपादत्रयंत्रयश्चतुर्थांशास्तस्यपंचां

इतिलीलावतीविलासेशून्यपरिकर्माष्टकाभिनयनं ॥२॥ अथव्यस्तविधिंसूचयति छेदमिति विलोमेविधौदृश्येव्यक्तेराशावुद्देशकेनोद्दिष्टेसति राशिप्रसिद्धयेनुक्तस्याव्यक्तस्यराशेः प्रसिद्धये ज्ञानायोद्देशकालायानुसारेणछेदंगुणंचछेदंकुर्यात् उद्देशकेनयेनांकेनगुणनमकारि तेन भजेत्

अथव्यस्तोद्देशविधौसूत्रं छेदंगुणंगुणं
छेदंवर्गंमूलंपदंकृतिं ऋणंस्वंस्वमृणंकु
र्याद्दृश्येराशिप्रसिद्धये । अथस्वांशाधिको
नेतुलवाढ्योनोहरोहरः अंशस्त्वविकृत
स्तत्रविलोमेशेषमुक्तवत् ॥२॥

येनचभजनंतेनगुणयेत् एवंवर्गेउद्दिष्टेमूलंकुर्यात् पदंमूलंचकृतिंवर्गंकुर्यात् तथाऋणंशोधधनंस्वधनंकुर्यात् धनंचऋणंकुर्यात् ॥ अनुष्टुप्॥ २॥ एवमभिन्नविषयमुक्त्वाभिन्नविषयमाह येति अथतत्रादृश्येस्वांशेनलवच्छेदात्मकेनाधिकेऊनेवोद्दिष्टेसतिविलोमेविधौचक्रियमाणेछेदघ्नरूपेस्थितितलस्यहारेलोतिचसाव ।

तिस्मात स्मिन्नेव करोति नैवेष्टैनेतत्सूत्रविधिना
भुजो भवति यश्च तत्र भुजः सात्र कोटिरिति किं
निमित्तमित्याकांक्षायामत्रेति ॥ अत्र क्षेत्र व्य
वहारे भुजस्य कोटित्वे कोटिश्च भुजत्वे न भ्रां
तव्यं विरोधशंकया प्रत्ययस्तु तत्कृतौ योग
पदं कर्ण इत्यनेन विधेय इति भावः ॥ अथेष्टा
त्र्यास्त्र ज्ञानाय सूत्रमाह इष्टयोरिति यथेष्टक
उदाहरणं यैर्यैस्त्र्यस्त्रं भवेज्जात्यं कोटि
दोःश्रवणैः सखे त्रीन पि विदितान्स्तां
स्तान् क्षिप्रं ब्रूहि विचक्षण १४ अत्रेष्टौ ।१।२
अनयोराहतिः २ द्विघ्नी ४ जाता कोटिः
अनयोर्वर्गयोः १।४ रंतरं ३ भुजः तयोः
कृतियोगः ५ कर्णः अथ वेष्टौ २।३ आ
भ्यां १२।५।१३ अथ वेष्टौ २।४। आभ्यां
१६।१२।२० एवमनेकधा ॥ कल्पितयोराह
तिर्मिथो गुणनं द्विघ्नी द्विगुणा कार्या सा कोटिर्भवति
तयोरेवेष्टयोर्यौ वर्गौ तयोरंतरं भुजः तयोरेवेष्ट
योः कृतियोगो वर्गसंकलनं कर्णः त्र्यस्त्रकरणे गतो
भवति १३ ॥ उदाहरणं यैरिति यैर्यैः कोटिभुज
कर्णैः जात्यं त्र्यस्त्रं जायते हे मित्र त्रीन प्यविदितान्

लीला. ज्ञातैस्तैस्तान्कोटिभुजकर्णान्दिप्रं शीघ्रं ब्रूहि वि
१०१ चक्षण निपुण १४ अथ रूपं द्विकं त्वेष्टं विस्मय
ज्ञीन मुद्धरति अत्रेति क्षेत्र दर्शनं | ४ ५ ३ | इद
मेव क्षेत्रं कोटिरन्नतुष्टयं यत्रेति प्र प
मधुदाहृतं अत्रेष्टं तरं २।३ अनयो राहति
६ द्विगुणा १२ कोटिः तद्वर्ग ४।९ तरं ५ भुजः
वर्गयो रैक्यं १३ कर्णः क्षेत्रं | १२ १३ ५ | एवमि
ष्टयो २।४ राहति ८ द्वि घ्नी १६
कोटिः वर्गयो ४।१६ रंतरं १२ भुजः कृति
योगः २० कर्णः क्षेत्रं | १६ २० १२ | एवमनेकधा
यथा इष्टे १।३ तदा हति ३ द्विघ्नी
६ कोटिः वर्गयो १।९ रंतरं ८ भुजः वर्ग
योगः १० कर्णः क्षेत्रं | ६ १० ८ | एवमिष्टे ५।
७ अनयो राहति ३५ द्विघ्नी ७० को
टिः वर्गयो २५।४९ रंतरं २४ भुजः वर्ग
योगः ७४ कर्णः | ७० ७४ २४ | एवमितरद
पि ज्ञेयं अथ मत्र मास्ति सं
ग्रहः कर्णः स्यादिष्टवर्गैक्यमिष्टवर्गांतरं १०१

ग्रहः कर्णः स्याद्द्विष्ठ वर्गैक्यमिषू वर्गांतरं भुजः
द्विष्ठ वर्गैक्यनिष्ठान्तरेन कोटिर्हृच्चेतने ।।१५।।
अथेमं सूत्रमुपपादयति कर्णकोटियुताविति ।
अत्रोद्देशकेन कर्णकोटियोगं भुजं चोक्त्वा कर्ण
कोट्योः पृथक्पृथङ्मानं पृच्छ्यते तत्र तयोः पृ
थङ्मानज्ञानायसूत्रमित्यर्थः वंशाग्रेति वंशो
कर्णकोटियुतो भुजे च ज्ञाते पृथक्करणार्थं
करणसूत्रं वंशाग्रमूलांतरभूमिवर्गो वं
शोद्धृतस्तेन पृथग्युतो नौ वंशौ तदर्द्धं भवतः
क्रमेण वंशस्य खंडे श्रुतिकोटिरूपे १५ उदा
हरणं यदि समभुवि वेणुर्द्वित्रिपाणिप्र
माणो गणक पवनवेगादेकदेशे स भग्नः भु
वि नृपमित हस्तेष्वंग लग्नं तदग्रं कथय कति
षु मूलादेष भग्नः करेषु ।।१६।।
वेणवादि स्तंभः कर्णकोटियुतिरूपः अग्रं च मूलं
चाग्रमूले वंशस्याग्रमूले वंशाग्रमूले त्रुटितवंशखं
डाग्रं यत्र भूमौ लग्नं तद्वंशाग्रं यत्र चाभग्न वंशस्ति
ष्ठति तद्वंशमूलं तयोरंतरे मध्ये या यावद्धस्तमि
ता भूमिः सा वंशाग्रमूलांतरभूमिस्तस्या वर्गो वं
शोद्धृतो वंशमित्या भक्तः कार्यः ततो यद्लब्धं तत् ।

फलं तेन पृथक्स्थानद्वयनिवेशितौ वंशौ युतोनौ
कार्यौ एकत्र युतोऽन्यत्र चोनः कार्य इत्यर्थः तदा।
र्द्धे त्तयोर्युतोनयोर्वंशयोर्दले क्रमेणश्रुतिकोटि
रूपे वंशस्य खंडे भवतः फलयुतवंशदलं का।
र्णः फलोनवंशदलं कोटिरित्यर्थः इंद्रवज्रा १५
उदाहरति यदीति भो गणक यदि समभुव्यति
निम्नोन्नतायां भुवि विषमभूमौ कर्णकोटिमानस्य
यथावज्ज्ञातुमशक्यत्वात्समेति भूविशेषणं द्वि
त्रिपाणिप्रमाणो द्वात्रिंशत्करो ह्यायः कोऽपि वे
णुर्वंशोऽस्ति स पवनवेगाद्वातकृतांदोलनब।
लेनैकदेशे भग्नस्त्रुटितस्तदग्रं तस्य त्रुटितवंश
खंडस्याग्रं नृपमितहस्तेषु मूलात्षोडशहस्त
मितभूभागे लग्नं एवं सति मया पृच्छ्यते एष
वेणुर्मूलादुच्छ्रयेण कतिषु करेषु भग्नस्तत्
कथय मालिनी १६ ॥ न्यासः अत्र वंशाग्र
मूलांतरभूमे १६ वर्गः २५६ वंशेनो ३२
हृतः फलं लब्धं ८ अनेन वंशः ३२ युतः ४०
ऊनः २४ तदर्द्धे २०।१२ जाते ऊर्ध्वाधरखंडे
तत्र कर्णः २० कोटिः १२ भुजस्त्वोक्त एव १६।

तथाहेत्रदर्शनं | १२ | १६ | त्रसय: प्राग्वत् यथा
भुजा १६ कृति: २५६ कोटि १२ कृति:
१४४ तद्योगो ४०० स्वपदं २० कर्ण: एवं को
टिभुजावधिविशोध्यप्रसेतयो एवं कोटिज्ञा
ने बाहुकर्णयोगतस्तयोर्विभागज्ञानाय सूत्र
माह स्तंभस्येति स्तंभो मयूराक्रान्तवृक्षा
दिस्तेन तत्संख्या लक्ष्यते तस्य वर्गो हिस्त्र विलंबा
मास: १२ तानेऊर्ध्वधरखंडे २०।१२
बाहुक १६ र्ण योगेच दृष्टे कोट्यांच ज्ञाता
यां पृथक्करणार्थं सूत्रम् स्तंभस्य वर्गो
हि विलांतरेण भक्त: फलं व्यालविलांतरा
लात् शोध्यं तदर्द्धप्रमितै: करै: स्याद्वि
लाग्रतो व्यालकलापियोग: ॥१७॥
हि विलैतयोरंतरेण मध्यभूभागेनोद्दिष्टेन ठ
जकर्णयुतिरूपेण भक्त: कार्य: तत्र यत्फलं ल
ब्धं तत व्यालविलांतरालात्पूर्वोक्ताच्छोध्यं वि
योज्यं तदर्द्धप्रमितैस्तस्य यदर्द्धं दलं तावद्भि:
करै: हस्तैर्मिते भूभागे बिलाग्रतो विलपुरस्तात्
व्यालकलापिनो: सर्पमयूरयोर्योगो मिलनं
स्यात् उपजाति: ॥१७॥

उदाहरणं अस्तीति हे गणक कस्यचित्स्तंभस्य
तले बिलं सर्पनिवासभूतं विवरमस्ति तदुप
रि तस्य बिलस्योपरि हस्तनवोच्छ्रितेकर नव
कोन्नते स्तंभे क्रीडामयूरः स्थितः स मयूरो
बिलात्त्रिगुणितं यत्स्तंभप्रमाणं तदंतरे सर्पं प्रवि
शंतिकरान्तराल मुनि प्राप्ते बिलस्य निवासभू
प्रदेशमाव्रजन्तमागच्छन्तमहिं सर्पं दृष्ट्वा तिर्य

उदाहरणं अस्ति स्तंभतले बिलं तदुपरि
क्रीडाशिखंडीस्थितः स्तंभे हस्तनवोच्छ्रि
ते त्रिगुणस्तंभप्रमाणांतरे दृष्ट्वाहिं
बिलमाव्रजंतमपतत्तिर्यक्स तस्योपरि
क्षिप्रं ब्रूहि तयोर्बिलात्कतिमितैः साम्येन
गत्योर्युतिः १८ स्वासः २ २७ जाता वि
लयुतो मर्ध्ये हस्ताः १२॥

कति रश्मीनः कर्णमार्गेण तस्या हेरूपर्यपतत्
उड्डीय पपात तत्र बिलात्कतिमितौ किंप्रमाणं
तरालेगत्योः साम्येन तयोर्युतिः सर्पमयूरयो
र्मिलनं स्यात्तत्प्रं ब्रूहि शार्दू· १८ स्वासः ८
स्तंभो २ स्यबंगः ८१ सर्पविलोतरं २७ तेन
[illegible]

त्र्यस्रे वा क्षेत्रे त्रिषस्त्रेव ३।६।१२ यत्र यो भुजाउ-
द्दिष्टास्ततादृशभुजनिबद्धं क्षेत्रं त्र्यस्रं चतु-
रस्रं चा क्षेत्रं विनिर्द्दिशेज्ज्ञ गणितज्ञः २२ न्यासः
त्र्यस्रं चतुरस्रे द्वादशकरमित भुजादितरेषां
त्रयाणां ३।२।६ युतिः ११ स्वल्पा त्र्यस्रे चन
वात्मक भुजेन शिष्ट भुजद्वय ३।६ युतिः स
मप्राक्षेत्रलक्षणं धृष्टोद्दिष्टमृजुभुज
क्षेत्रं यत्रैकबाहुतः स्वल्पा तदितरभुजा-
युतिरथवा तुल्या ज्ञेयं तदक्षेत्रं २५ उदा
हरणं चतुरस्रे त्रिषट्द्व्यर्कभुजास्त्र्यस्रे
त्रिषस्त्रेव ३ द्दिष्टा यत्र धृष्टेन तदक्षेत्रं
विनिर्द्दिशेत २२ न्यासः ३ १२ ६ ३ १२ २
एतेनुपपन्ने क्षेत्रे भुजप्रमा
णमृजुशलाकां भुजस्थाने धृ विन्य
स्यानुपपत्तिर्दर्शनीया ॥ =
मानात तेनयोरक्षेत्रत्वे अनयोरनुपपन्नत्व
मनुभावयति भुजप्रमाणमिति क्षेत्रयोरृजु
भुजतो क्षेः सर्वेन भुजेन ततस्पार्श्वपूर
णासंभवादनुपपन्नत्वं यथा | ३ २ १२ | ६ ३ २ |

अथ त्र्यस्रक्षेत्रे लंबाबाधाफलानां ज्ञानाय सू
त्रमार्याद्वितयेनाह त्रिभुज इति अत्र त्रिभुजा
दिक्षेत्रे धरस्य भुजो भूमिसंज्ञः पार्श्वभुजौ तु
भुजावूर्द्धगौ मुखमिति ज्ञेयं तथा च त्रिभु
जे क्षेत्रे भुजयोः पार्श्वगभुजसंख्ययोर्यो यो
विधेयः स च पुनस्तदंतरगुणस्तयोर्भुजयो

करणसूत्रमार्याद्वयं त्रिभुजे भुजयोर्यो
गस्तदंतरगुणो भुवा हृतो लब्ध्याद्वि।
स्था भूरूनयुता दलिताबाधे तयोः
स्यातां ३ स्वाबाधाभुजकृत्योरंतर
मूलं प्रजायते लंबः लंबगुणं भूम्यर्द्ध
स्पष्टं त्रिभुजे फलं भवति ३।

यदंतरं विवरं तेन गुणितो भुवाधोगतभुजमा
नेन हृतो भक्तः कार्यस्ततो यल्लब्धं तेन तया ल।
ब्ध्या द्विस्था स्थानद्वयनिवेशिता भूरूनयुता
दलिता कार्या तेन दलेन यो भुजयोराबाधे स्यातां दी
र्घस्य दीर्घा स्वल्पस्य स्वल्पा ३ एवमाबाधोन
यनविधिमुक्त्वा तदधोलंबानयनमाह स्वा
बाधेति यद्भुजापेक्षया लंबः आनेयस्तद्भु।

जसंबंधिन्यावाधास्वावाधासएवभुजश्रुत्योः
कृतीपृथक्पृथक्कोर्गैनयोर्यदंतरं विश्लेषस्तस्य
मूलेलंवः स्यात् एवंभुजयोरावाधयोश्चवैष
म्येपिलंवः एएवेतिवोध्यं स्वावाधाकृतिहीना
द्भुजवर्गाद्यस्पदंतहिहलंवइति पाठांतरमर्थः
सएव एवंलंवेज्ञातेफलानयनमाह लंवेति ।
भूमेरर्द्धदलंलंवेनगुणितं त्रिभुजे स्पष्टंफलंजा
यते श्रवत्रिभुजइसुक्ताचतुर्भुजेतथानीतफल
स्यास्पष्टताध्वस्यते ॥ ३१

उदाहरणं क्षेत्रेमहीमनुमितात्रिभुजे
भुजौतुयत्रत्रयोदशतिथिप्रमितौच
यस्य तत्रावलंवकमितिं कथयावधे
चविप्रतथाचसमकोष्टमितिंफला
ख्यं १२लंध्येग्राबाधे २।५लंवश्च १२
क्षेत्रफलंच ८४

उदाहरति क्षेत्रइति हेवयस्यमित्रयत्रत्रिभुजे
क्षेत्रेमहीभूमिसंज्ञोभुजोमनुमिताचतुर्दशाक
रमिताभुजौपार्श्वगौतुत्रयोदशतिथिप्रमितौ

एकः १३। परः १५ करमितइति तत्र क्षेत्रे व
लंबकमिति लंबमानं च पुनः वधे भू खंडे
तथा फलाख्यां फलसंज्ञकां समकोष्ठमि
तिं समचतुरस्रकोष्ठपरीमाणं च कथय ४२
वसंततिलकावृत्तं॥ न्यासः १३ १५ अत्र वि
भुजे भुजयो १३।१५ योगो २८ (१४) भुजां
तरेण २ गुणितः ५६ भुवा १४ भक्तो लब्धि
४ स्तया भूमि १४ र्द्विस्थोनयुता १०।१८
दलिता ५।९ जातमाबाधाद्वयं अधिकस्य
९ स्वल्पस्य ५ तिययोश्चितयोर्ज्ञं अथ लंबः
समानीयते भुज १३ स्तदीयाबाधा च ५ त
योः कृती १६९।२५ तयोरंतरं १४४ तन्मू
लं १२ जातो लंबः यदा भुजः १५ स्तथाबाधा
९ तद्वर्गयो २२५।८१ रंतरं १४४ मूलं १२ जा
तः स एव लंबः अथ फलं भूमे १४ रर्द्धं ७ लं
बगुणं ८४ जातं फलमिदमेव समकोष्ठमा
नं तथा च क्षेत्रदर्शनं अत्र फ
लस्य प्रत्ययो वक्ष्य माणः॥



15

सर्वदोर्युतिरितिसूत्रोक्तरीत्या विधेयः सा
च तत्रैव प्रदर्शयिष्यते ॥
अथोदाहरणांतरमाह दशेति हे गणित
क गणितशास्त्रनिपुण यत्र क्षेत्रे त्रिभुजे भुजौ पा
र्श्वगौ दश सप्तदश कर मितौ एको भुजो द्विती।
यस्तु सप्तदश कर मितो भवति मही भूमिस्तु।
उदाहरणं दशसप्तदशप्रमौ भुजौ त्रिभुजे
यत्र नवप्रमा मही अवधे वद लंबकं तथा
गणितं गणितिकाशु तत्र मे ३३ न्यासः।
१० □ १७ अत्र त्रिभुजे भुजयोर्योग इत्यादि
९ ना लब्ध २१ मनेन भू रूनानस्या
दित्यस्मादेव भू रपनीताशेषार्द्धमृण
मताबाधादिग्वैपरीत्येनेत्यर्थः ज्ञातआ
बाध ६।१५ अत्रोभयत्रापि ज्ञातो लंबः
८ फलं ३६॥
नवप्रमा नवहस्तमिता स्यात्तत्र क्षेत्रे अवधे भू
खंडे वद तथा लंबकं मध्यलंबं गणितं क्षेत्रफ
लं च मे मम आशु वद षड्द्विषमे षोसमे कलावै
लीयें तेरलो गुरुरिति ॥ ३३ ॥ न्यासः ॥ १० □ १७
९

अत्रभुजयो १।१७ र्योगो १८ भुजांतर ७ गु
ण: १८२ भुवा २ भक्तः लब्धि २१ जीता
द्विस्याभूरनयोनापुनाचकार्या स्वल्पाचभू
र्लब्धाशोधयितुंनशक्यत इतितत्र संस्कार
वैपरीत्यमाह अनेनभूरूमानस्यादिति अ
तोलब्धिरेव ९ भुवोनिता १२ तदर्द्धं ६ एको
भूखंडरूणगतोज्ञेयोदिग्वैपरीत्येनेत्यर्थः
एतज्जन्यफलंक्षेत्रफलाच्छोधयिष्यतइति
भाव: अन्यत्रलब्धा २१ भुता २१ भूर्जा
ता ३-दलिता १५ द्वितीयावाधा आवाध
यो र्योगे ६।१५ जाता २१ भूमिपरिमितिः
अथलंवः स्वावाधा १५ भुज १७ कृत्यो २२५।
२८९ रंतर ६४ मूलं ८ जातोलंवः एवं
स्वावाधा ६ भुज १० कृत्यो ३६।१०० रंतर
६४ मूलं ८ जातोलंवः अथफलंभूमे २१
रर्द्धं २१/२ लंव ८ गुणं १६८ छेदभक्तं ८४ फ
लं यद्वाभूमेर्दलासंभवेलंवार्द्ध हता भूमि
रिति यथालंवार्द्धं ४ तद्गुणा भूर २१ जातं

ह

सनम लक्ष्म्याश्रितं चतुर्बाहुं लक्ष्मीनारायणं भजे
ॐ वासुदेवोवतु मे मस्तकं सशिरोरुहम् ह्रीं ललाटं
सदा पातु लक्ष्मीविष्णुः समंततः ह्स्रौं नेत्रे वता
त्ल्लीं गोविंदो जगतां पतिः ह्रीं नासां सर्वदा पा
तु लक्ष्मीदामोदरः प्रभुः श्रीं मुखं सततं पातु
देवो लक्ष्मीत्रिविक्रमः लक्ष्मीः कंठं सदा पातु
स्कंधे नारायणोवतु यं हस्तौ सर्वदा पातु देवलक्ष्मी
जनार्दनः नमः पाशौ सदा पातु लक्ष्मी नंदैकनंदनः
अं आं इं ईं पातु वक्षो ॐ लक्ष्मीत्रिभुरेश्वरः उं ऊं ऋं
ॠं पातु कुक्षिं ह्रीं लक्ष्मीगरुडध्वजः लृं लॄं एं ऐं पा
तु पृष्ठं ह्स्रौः लक्ष्मीनृसिंहकः ओं औं अं अः पातु
नाभिं ह्रीं लक्ष्मी विष्वक्सेनः कं खं गं घं ङं दपा
तु श्रीं लक्ष्मी कैटभांतकः चं छं जं झं पातु शिश्नं ल
क्ष्मीं लक्ष्मीश्वरः प्रभुः टं ठं डं ढं कटिं पातु नाराय
णो य नायकः तं थं दं धं पातु चौरुं नमो लक्ष्मीज
गत्पतिः पं फं बं भं पातु जानु ॐ ह्रीं लक्ष्मी चतुर्भु
जः यं रं लं वं पातु जंघे ह्स्रौः लक्ष्मी गदाधरः शं

६. घंसंहं पातु उसौं ह्रीं श्रीं लक्ष्मीतघोगम्त लंनः पा
२. दौ सदा पातु मूलं लक्ष्मीसहस्रपात् ठंठं ठं ठं मे
३. पातु लक्ष्मीशः सकलवपुः इन्द्रो मां पूर्वतः पातु
२५ वह्निर्वह्नौ सदावतु यमो मां दक्षिणे पातु नैऋत्यां
निर्ऋतिश्च माम् वरुणः पश्चिमेव्यान्मां वायव्येव
तु मामरुत् उत्तरे धनदः पाया देशान्यामीश्वरो
वतु वज्रशक्ति दण्ड खड्ग पाश यष्टि ध्वजांकिताः
सम्मूलाः सर्वदा पातु दिगीशाः परमार्थदः
अनंतः पात्वधो नित्यमूर्ध्वे ब्रह्मावताच्च माम्॥
दशादिक्षु सदा पातु लक्ष्मीनारायणः प्रभुः प्रभाते
पातु मां विष्णुर्मध्याह्ने वासुदेवकः दामोदरोवता
सायं निशादौ नारसिंहकः संकर्षणोर्धरात्रेव्या
त्प्रभाते व्यात्त्रिविक्रमः अनिरुद्धः सर्वकालं वि
ष्वक्सेनश्च सर्वतः रणे राजकुले द्यूते विवादे
शत्रुसंकटे ॐ ह्रीं ह्सौः श्रीं श्रीं मूलं लक्ष्मीना
रायणोवतु ॐ ॐ ॐ रणराणरणवैरिरिपुतः पा
याच्च मां केशवः ह्रौं ह्रीं ह्रौं हहहहा ह्सौः हसह

3

सो: वहेदनान्माधव: ह्रीं ह्रीं ह्रीं तलपर्वताग्रभ
पृत: पापादनंतोविष्णु: स्त्रीं स्त्रीं स्त्रीं शशशाल
ले प्रतिदिने लक्ष्मीधर: पातु मां इतीदं कवचं
दिव्यं वज्रपंजरकाभिधं लक्ष्मीनारायणस्येष्टं
चतुर्वर्गफलप्रदं सर्वसौभाग्यनिलयं सर्वसार
स्वतप्रदं लक्ष्मीसंवननं तत्वं परमार्थरसायण
म् मंत्रगर्भं जगत्सारं रहस्यं त्रिदिवौकसां
दशवारं पठेद्रात्रौ रतांते वैष्णवोत्तम: स्वप्ने
वरप्रदं पश्येल्लक्ष्मीनारायणं सुधी: त्रिसंध्यं य:
पठेन्नित्यं कवचं मन्मुखोदितम् सयाति परमं
धाम वैष्णवं वैष्णवेश्वर: महाचीनपदस्थो वि
य: पठेदात्मचिंतक: आनंदपूरितस्य णोल
भेन्मोक्षं स साधक: गंधपुष्पकेन विलिखेद्भूर्जे
भूर्जे जपेन्मनुम पीतसूत्रेणसंवेष्ट्य सौवर्णेना
थ वेष्टयेत् धारयेद्गुटिकां मूर्ध्नि लक्ष्मीनाराय
णं स्मरन् रणे रिपून्विजित्वा प्रकल्याणी गृहमावि
शेत् वंध्या वा काकवंध्या च मृतवत्सा च यांग
ना सा वध्नीयात्कण्ठदेशे लभेत्पुत्रांश्चिरायुष: ७

दे. र. ३. २६

रूपदेशतोधृत्वा गुरुं ध्यात्वा मंत्रं जपन् वर्मलक्षं तु
रश्चर्यफलमाप्नोति साधकः बहुनोक्तेन किं दे
विकवचस्यास्य पार्वति विनानेन न सिद्धिः स्या
न्मंत्रस्यास्य महेश्वरि सर्वागमरहस्याढ्यं त
त्त्वतत्त्वपरात्परं अभक्ताय न दातव्यं कुचैलाय
दुरात्मने दीक्षिताय कुलीनाय स्वशिष्याय म
हात्मने महाचीनपरस्याय दातव्यं कवचोत्तम
म् गुह्यं गोप्यं महादेवि लक्ष्मीनारायणप्रियम्
वज्रपंजरकं वर्म गोपनीयं स्वयोनिवत् इति श्री
देवीरहस्ये तंत्रे लक्ष्मीनारायणकवचाख्यानं ना
म पटलः ॥ श्रीभैरवः अधुना कथयिष्यामि वि
द्यां साहस्रनामिकीम् भोगदां मोक्षदां लोके लक्ष्मी
नारायणस्य ते भोगापवर्गदं दिव्यं वक्ष्ये नामसहस्र
कम् सर्वमंत्रमयं तत्त्वं सर्वपूजाफलप्रदम् सर्वा
गमरहस्याढ्यं सर्वदेवैकवंदितम् श्रीभैरवः ए
तद्रहस्यं परमं मंत्रनामसहस्रकम् लक्ष्मीनाराय
णस्येष्टं सर्वस्वं तत्त्वतो मम गुह्यं गोप्यतमं देवि
सुखदं धर्मवर्धनम् लक्ष्मीसंवननं लोके परत्र

5

परमार्थदम् महाचीनपदस्थानां कौलिकानाम
मीष्टदम् उपपातकपापानां शमने दमकारणं
सर्वतीर्थफलोद्दिष्टं सर्वयज्ञफलप्रदं सर्वदेवस्तु
ते साध्यं चतुर्वर्गफलप्रदम् अवाच्यं मार्गहीनानां
मभ्रष्टचेतसाम् वैभवः कौलिकः श्रेष्ठः प
ठेन्नामसहस्रकम् गुरूपदेशतो देवि सर्वसिद्धिम
वाप्नुयात् अस्य श्रीलक्ष्मीनारायणसहस्रस्य शिव नाम
ऋषिः त्रिष्टुप् छन्दः श्रीलक्ष्मीनारायणो देवता
श्रीं बीजं ह्रीं शक्तिः ॐ कीलकं धर्मार्थकाममो
क्षार्थे जपे पाठे विनियोगः ॐ लक्ष्मीविष्णुरीशानो
लक्ष्मीकान्तो विनायकः विश्वम्भरी विश्वनाथो वि
श्वसूर्विश्वसूदनः लक्ष्मीरजो महात्मा च पर
मात्मा परात्परः अपारविभवो भवो भवभूति
मयो भवः लक्ष्मीध्रुवो महालक्ष्मीर्देवलक्ष्मीर्भवो
नमः लक्ष्मीधराधरो लक्ष्मीधाराधरसमद्युतिः
विश्रुतो विकलो व्यग्रो विलासी गीतवल्लभः वि
द्याधरप्रियो विद्यावादी विद्याविशारदः पटनृ
त्यादलो द्युतिः पीतपट्टधरो भगः भाग्यवान्नो
गदो भार्गो भग्यभाव विवर्धनः लक्ष्मीकौलेश्वरो

6

ल०सी०रु० २८

लक्ष्मीगुहो लक्ष्मी विभावसुः लक्ष्मी वीरेश्वरो लक्ष्मी
धन्यो लक्ष्मी विभाकरः अचिंत्यो नित्य संयोगी सं
यमी यमनीति हृत् यामिनीश प्रियकरो राहुध्वं
सी विषापहः धीरो भ्रमहरो भीमो भीमास्यो भी
मवंदनः हारिकंकणभूषाढ्यो मौलिमाल्य पू
रोचितः किंकिणीरव संतुष्टो वंशीवादन तत्परः
स्यात् गुणरूपो चरगति प्रा[illegible]हुच[illegible] ज[illegible]नयी ल
क्ष्मी विनयवाँल्लक्ष्मीजयवाञ्ज्जलिताकृतिः लक्ष्मीने
त्रो वशी लक्ष्मी हासवेशो विनंतकः नाट्य प्रियो नंदो
नंदो सर्ववित् सर्वसारभृत् वांसवोगोपसर्गेष्टो वे
णुवादरततरः आत्मा परमात्मा ज्ञानात्मा लोकाधप्रः
सुरेश्वरः सत्यः सुत्यः शुचिर्नित्यो नित्यात्मा नि
त्यदर्शनः पंचनादमयोनंतः पंचमाकारवर्ज्जनः
पंचमस्वरसंगीतः कीर्तिदो मोहनाशनः लक्ष्मी परः
पुमाँल्लक्ष्मी शक्तिदो भक्तितोषितः लक्ष्मीयोगेश्वरो
लक्ष्मी योगदो भोगदायकः लक्ष्मीलोकेश्वरो लक्ष्मी
वसुलक्ष्मी मनोहरः अचिंत्यमहिमाचिंत्यगरिमा
घोरनिःस्वनः सुखी सुखप्रदो दिव्यरूपो देवस्व
रेश्वरः कामदो वो विधिर्वन्द्यो वेदविद्वेदनायकः २८

क्रूरूपः सा[illegible]मगीतज्ञो यजुर्यज्ञभुजांपतिः या
ज्ञिको यमिनो मातात्रिकोलजनकोजरः कामप्रदः
कामिवरः कमनीयाकृतिः कुरूः लक्ष्मीरघुवंशः
प्रीतो लक्ष्मीश्रीदः श्रियःपतिः लक्ष्मीकामो लक्ष
णोशो लक्ष्मीरामोतिकेदरः अनिवर्तीचनिःसंगो
निर्भयो निरुपद्रवः निराभासो निराधारो निर्लेपो
निरहंकृतिः निराश्रयो निर्गुण श्रगुणातीतो गणे
श्वरः ब्रह्मस्वरूपब्रह्मज्ञो बृंहणो ब्रह्मवर्धनः म
हाक्रतुर्यज्ञवपुर्वराहो यज्ञनाशनः महारुद्रो मह
देवो माधवो मधुसूदनः लक्ष्मीनिरंजनो लक्ष्मीसि
द्धिदः सिद्धिवर्धनः लक्ष्मीश्रीवत्सवक्षश्च लक्ष्मी
कौस्तुभभूषितः सर्वलोकधरो दक्षो देतिदंतायु
धो दमी अप्रमेयगतिः शांतः शमी कामी कृतागा
मः महाकर्मी महाचीनो मकारशिवपूजितः वाम
मार्गरसो द्विजः सर्वाचारैकमध्यगः मांसाहारी ला:
नित्यमांसी मीनासवरसाकुलः [illegible]प्रियो रतानं
दः रतो रतिपतिप्रियः [illegible]देव[illegible]मारिजिनदे
वो दिवाकरः निशानाथो नभमयो नवग्रहसमर्चि

दे. र. उ. २८

नः मत्स्यरूपो विरूपाक्षो वारांनिधिनिवासकः पी
नबाहुः स्थूलपादो दीर्घचतुरलंकृतः पादामित
क्रमातीतः सत्यसंधः सनातनः लक्ष्मीसनातनो
लक्ष्मीधर्माध्यक्षो धनेश्वरः लक्ष्मीधनप्रदो लक्ष्मी
धर्मभागी च धर्मवान् वीरहा पुंडरीकाक्षः प
द्मनाभो जगत्पतिः पद्मासनो ब्रह्मयोनिर्ब्रह्मयो
विगतस्मयः समानः समदृष्टिस्त्वविषमो विषमे
क्षणः चतुर्मूर्तिस्त्रिमूर्तिस्त्वचिंतनः चित्रिणी
पतिः सहस्रबाहुः देवेशो ब्राह्मणो वणिजां
पतिः सर्वव्यापी सर्वमुखः सर्वदेवनमस्कृतः
शक्रार्चितो नक्रपतिर्वरुणः शक्रसोदरः दर्प
हा सर्पशयनः सर्पाशनवरप्रदः अमानी मान
दो मान्यो मानवेंद्रो मनूत्तमः मनुवंश्यो मराध्य
क्षो लेखो लोकैकरक्षकः अतिथिस्तिथिनाथश्च
नक्षत्रपरिवेशगः चतुर्भागी चतुःस्रोत्रो विश्रवा
विलयप्रदः प्रलयांतकरः प्राज्ञो जननीजनक
प्रियः यशस्वी श्रीधरः शांतः शंकाशतवि
नाशकः अक्रूरवरदः क्रूरः कौरवाणां

यकः सुवर्णमुकुटो मारो मारसूर्मणिभूषणः
मौक्तिकोमंजुलो मंत्री मौक्तिकेष्ठवरप्रदः लक्ष्मी
वितर्कवांल्लक्ष्मी कंदो रोवधूरो चयः प्राजितः सु
रवितस्त्रानु स्त्रानुयः कीर्तिवीर्यकः लक्ष्मी पच
धरो लक्ष्मी चंद्रहासो विकर्षनः लक्ष्मीगोवर्ध
नधरो लक्ष्मीकम्बुधरो विराट् खेदो श्रयो रि
पु ध्वंसी देवसेनादिनायकः अनुकूलोनु
कूटस्त्र सप्तआत्मा मनुंदरः भगर्भीस्वदपु
र्गोप्राकर्ता हर्ताशतक्रतुः अतुलः केमालः
कोपीरमणो मणिकुण्डलः लक्ष्मीकेयूरवाँ
ल्लक्ष्मीमणिदामविराजितः लक्ष्मीनूपुरवाँ
ल्लक्ष्मी मुक्तामालाविभूषणः लक्ष्मीगोदांगुलि
त्राणो लक्ष्मी सौवर्णकंकणः लक्ष्मी विराजितो
लक्ष्मी विविधाभरणोज्वलः ककारादिह्नकारां
तविद्याभूषणभूषितः अकाराद्यह्नरस्फीतो
निःशेषसुरमण्डितः वर्णमाल्यो महाविद्यामा
नृकान्तरतत्ववान् लक्ष्मीकामेश्वरो लक्ष्मी^
कामुकोनिर्जनेश्वरः कलावान्कीर्तिमान ^

१३ 10

दे. र. ३. २९

श्रकुंभाराप्राणहारकः केशांतकः कालसूक्ष्मकाल
हकृमहाटकी कीनकुजः कुंभधरः कलक
एठः कुलालकः कुलाध्यक्षः कुलाचारीकुला
कुलपदार्चितः करंजकः कर्तरीशः कनकःक
र्तरीकरः कलंकरहितः कोकः कोकशोक
निवर्हणः कपिलः कलशेकालः कौलिका
कुलमानसः लक्ष्मीकुलाकुलोलक्ष्मीकुलजः
कर्मवर्धनः लक्ष्मीकामेश्वरोलक्ष्मीनवना
थविनायकः लक्ष्मीकनिष्ठो निष्पष्ठोलक्ष्मीयोगी
न्द्रयोगदः खर्परः खेचरः खेटः खगमानी
खलांतकः खरूपः खगरूपश्च खनित्रः खे
टनायकः खगायुधः खड्गधारीखपरिदाण
भंजनः खरध्वंसीखरोरावः खर्वराकारभी
षणः खरवटोलः खगगतिः खेचरीश्वर
सेवितः खेचरीगणसेव्यश्च खंडमुद्रानिमंत्रि य
तः खड्गायुधः खड्गपालः खेतः खवर्णभूष
णः लक्ष्मीखेशः खेकरूपोलक्ष्मीभास्वरमूर्ति
मान् लक्ष्मीखड्गोगभ्रक्षलक्ष्मीखेचरः खाश्मली
पितः लक्ष्मीचितानिलयोलक्ष्मीभस्मीकृतान

२९

॥

त: लक्ष्मीमूर्तिप्रदो लक्ष्मीज्योतिष्मान्नन्दरोचित: ल
क्ष्मीगीत: सुरालापी गोमति गोकुलेश्वर: गंगा
धरप्रियो गोष्ठी गोपालो गंधवर्धन: गंधवाह
प्रियो गीतो गीतिज्ञो गीतिलालस: गुंजाहारप्रियो
गांडीगरूर्गोवाहनागव: गाम्भीर्यवान् गुरूर
तो गुरुशब्द विवर्धन: गुरुभक्तिप्रियो गोलो गं
डशैल निवासक: गर्जन्नादो गोवृपतिर्गोमा
गप्रियो गवान् गिरिंगागजवक्त्रो शोगणनायक
नायक: गंधर्वनाथवरदो गगगौचरपूजित:
गर्भहीनो गर्भवाही गुणीयो गुणसागर: गुणाती
तवपुर्गण्यो गुप्तमार्गप्रवर्तक: गुप्तमंत्रप्रियो गो
प्यो गुह्यो गुह्यकवल्लभ: गोपीतो गिरिनाथश्च
गिरिधारी जगन्निधि: लक्ष्मीप्रिय: प्रिय: प्रीतो
लक्ष्मी गरुडवाहन: लक्ष्मीकपोतनिलयो लक्ष्मी
कल्पद्रुमो रवि: लक्ष्मीसंतानक: सारो लक्ष्मी
सारो लक्ष्मापति: लक्ष्मीग्राह्य: सुलक्ष्माचल
क्षीसागरनन्दन: घृणी घृणि मयो घष्ठो घुसृण
रक्तईश्वर: घृणामानो घहंतीच घृणिनाथो घ

ल

12

९. वर्णभाक लक्ष्मीचिंतामणि: साधुर्लक्ष्मीवीरवरो
२. नम: लक्ष्मीचतुर्भुजो लक्ष्मीविश्वनाथो विनायक:
३. टवर्णजानरूपश्च जानत्रोटोररूपवान् टवर्ण
१०. रूपो विश्वेशो टकाराक्षरमंडल: लक्ष्मीसेयोनि
र्गणात्मा लक्ष्मीशान: शिवार्चित: चारुरूपश्चारु
गतिश्चारुमूर्तिश्च मकृति: चारुनेत्रश्चारुकरश्च
श्चारुवाहुश्चतुर्भुज: चारुहस्तश्चारुनखश्चा
रुकेशश्च भूपति: चितावासी चरो चेलश्चीनाम्ब
रधरोच्युत: चारुहासश्चारुदन्तश्च वनश्चंद्र
वासित: चंद्रश्चंद्रकलानाथश्चारुपादश्चारुपा
श्चतुर्गति: चतुरात्मा चतुर्यात्मा चतुर्भूमिधरो
धर: चतुःसमुद्रशयनश्च्युत: सागरलंघन: चतु:
ग्रीतिश्च च्याश्चतुर्वीरवरोवर: चतुर्वेदमयो ८
वेद्य: चार्वंगश्चारुभाषण: चतुर्वक्त्रश्चतुर्व
क्त्रपूजित: परमेश्वर: चलश्चंद्रकशोभाढ्यश्च
लनूपुरकूजित: चलदंभोदसदृशश्चलदंभो
जलोचन: चलदंभोदवदनश्चलंभोदशोभित: ६
चलत्कनककेयूरश्चलत्कांचनकुंडल: चलत्का

३०

13

नकभ्रूगोभक्ष्य लत्कनकशेखरः चकाररूपश्चा
रेशश्चकारार्ह्यविभूषिणः लक्ष्मीशांतोमहादक्षो
लक्ष्मीपीताम्बरच्छविः छत्री छत्रधरश्छात्र
च्छिन्नमस्ताप्रियःपिता छितास्छेदी छिन्नमुखः
छकार स्वररूपवान् लक्ष्मीकांतिः कांतियुतो
लक्ष्मीसाधकरेश्वरः जगन्नाथोजगद्भर्तीजगत्कर्ती
जगत्स्थितिः जगत्त्रयकरोजेताजगतांपतिरुत्तमः
जगत्स्वामीजगद्धाता जगत्संहारकारकः जीवात्मा
परमात्मा स्त्री जगद्भूमिप्रदोभवः जगद्गुणीजगत्स्तु
तोजगदानन्ददायकः जगत्संतोषभूतात्माजग
क्रोधदयान्वितः जगद्दीप्तिकरोवेदोयासितोजग
दीश्वरः जवीजवान्वितोजारोजगदाउम्बरप्रियः ज
गत्सेव्योजगद्भीतोजगद्दिष्टोजगन्मयः जृम्भनोज
टिलोजीवोजम्भारातिवरप्रदः जामाताजलधेर्जा
तोजटामुकुटमंडितः जितारिर्जयदोजेयोजयकृद्दै
रिसूदनः लक्ष्मीकुचतटासीनोलक्ष्मीनयनगोच
रः झल्लरीझंकृतोझल्लीझखंडप्रतापनः झंक
रीझंकृतिर्झल्लीरवोझंकारिनूपुरः लक्ष्मीवरोम
हालक्ष्मीसिद्धिदोदेववन्दितः जकारंजारमोशो

दे० र० उ० ३८ नवर्णामृतरूपवान् लक्ष्मीस्वभूः स्वर्गपतिर्लक्ष्मी
वेद्यो विधुंतुदः टकारोटङ्कहस्तश्च टांतोटीका
र पूजितः लक्ष्मीदेवो महादेवदेवो लक्ष्मीदांतः
कृपानिधिः ठकुरोडालकोठस्याट वर्णसुध
मानिधिः लक्ष्मीर्विष्णुर्विकर्तादृवैनतेयधृजोध्व
जः डुनरूडीमरेशानोड कारा द्वार मण्डनः ल
क्ष्मीपतिः पीवरांगो लक्ष्मीनायकनायकः ढक्का
रवो ढक्कभेद्यो ढक्कासुरनिसूदनः लक्ष्मीजेता
जयकरो लक्ष्मीशो लम्बमूर्धजः लक्ष्मीजगत्स्थ
तिर्लक्ष्मीशारीर्लक्ष्मीगदाधरः णांतो णवर्णि
को णो शोण वर्णामृतसादितः लक्ष्मीगदाधरो ।
लक्ष्मीप्राणो लक्ष्मीरथांगान्त तमेतुलसमहा
सुस चितस्सुर्यार्णमंडितः तोतुलसुलसीना
थस्तत्त्वेशो मंत्रनायकः तपःफलप्रदस्तामस्र
पोतुलपराक्रमः तुष्टिरूपस्तुष्टिगतिस्तपस्वी
तापसप्रियः तुहिनांशुस्तुहिनजस्तुषारकरशो
भितः तुरीसेवस्तुलानस्थ तकारादार मंडितः
लक्ष्मीशो रवधुर्यो लक्ष्मीनन्दकेशसुवर्णितः ।

स्थविरः स्थूलगात्रश्च स्थाणुसेव्यस्य शब्दभृत् स्थाली
रसप्रियोस्थूलः थकारेश्वरकेश्वरः लक्ष्मीजीवेश्वरो
लक्ष्मीधरोलक्ष्मीनृसिंहकः ह्यावाद्यपतिर्दक्षो द्यूतदं
भविवर्जितः दरिद्रहादुःखहर्ता दौर्भाग्यक्षयकृद्दयी
दीनोदीनप्रभुर्भस्मीदयितो दयवाचकः दानकृद्दातृ
फलदोदनुजेन्द्रक्षयंकरः दैत्यहादर्पदैत्यघ्नोदर्प
क्षयंकरः दारप्रियोदीर्घनखोदुष्टासुरनिसूदनः
देवदेवोयशोवंद्योदकारक्षरमंडितः लक्ष्मीदया
करोलक्ष्मीदेवोलक्ष्मीदयानिधिः धनदोधनकृ
द्धन्योधनदेशोधनप्रदः धृतिमान्धर्मवान्धर्मी
धर्मकर्मविचक्षणः धर्माध्यक्षोधनाध्यक्षोधव
लोधीरवान्धनी धीरोधैर्यकरोधर्मदक्षोधनदपू
जितः लक्ष्मीधरोमहालक्ष्मीधवोलक्ष्मीमनोभवः
नवीनोनूतनोनम्रोनटनोनाट्यतोषितः नगोना
गोनगश्रेष्ठोनगर्भन्नागभूषणः नृसिंहोन्नवरोनां
तोनरनारायणोनवः नगराजोनागगतिर्नागांत
कध्वजोनलः नागारूढोनिम्नगामिर्नंदिसेव्यो
नटेश्वरः नलिनाख्योनविंद्योपिनायकोनागना

यकः नर्मदातीरलीलाढ्यो नलिनीपतिलोचनः
दै. नरेशो नृपपूज्यश्च नागशायी नगोत्तमः नारा
र. यणो निष्कलङ्को नवर्णाकृतिरात्मवान् लक्ष्मीना
३. गो नगधरो लक्ष्मीशानो नृरूपवान् पुष्पप्रि
३२ यः पुष्पशय्याशयानः पुष्पशेषरः पुष्पधन्वा
प्रद्युम्नश्च पुष्पभुः पुष्पपूजितः पूज्यः पवित्रं
परमं परमर्षिपितामहः परंपदं पुरं पुण्यं प
रमायुः परात्परः पारावारसुताभर्ता परमे
शः परंमहः पुण्यदः पुण्यकृत्तमः पुराणग
मपूजितः पुराणपुरुषः पीनः पीनवक्षाः जि
तेन्द्रियः पीतवासाः पीतमालः पीतवर्णः प
राङ्कुशः मन्त्रगो विश्रुतः पार्थः पथिकः
पार्थतोषदः पूर्वपौरजनस्य[illegible]ः पवर्णाक्ष
रमंडनः लक्ष्मीपीताम्बरो लक्ष्मीपीतो लक्ष्मी
परः पुमान् फलेफणिवरः स्फीतः फल
लक्ष्मीफलप्रदः स्फीतात्मा[illegible]कुलभंश्च फल त
कृत्फलप्रदः फणीफणिशय्याशयानः॥
श्च फकारामृतरूपवान् वालकोवृद्धि।

न्त्रस्य मन्त्रोयं सम्पुटाभिधः विष्वमादौ म
नोर्देवि नाम्नाग्रे मकलां जपेत् लक्ष्मीवराह म
न्त्रस्य मन्त्रोयं सम्पुटाभिधः सरोजं प्रथमे देव
व नान्ते वरमां जपेत् जामदग्न्य मनोरेषमन्त्रः
संपुटकारकः तारमन्त्रे वनं त्वादौ जपे साध
कसत्तमः श्रीसीताराम मन्त्रस्य मन्त्रोयं संपुटा
भिधः विश्वान्ते नाम देवेशि मायुग्मं प्रथमं ज
पेत् श्रीजनार्दनमन्त्रस्य मन्त्रोयं संपुटाभि
धः परामादौ परामन्ते जपे साधकसत्तमः
विश्व ... नमनोरेष मन्त्रः संपुटकारकः वा
णीमादौ जपे देवि लक्ष्मीमन्त्रे महेश्वरि श्रीवाम
देव ... मन्त्रस्य मन्त्रोयं संपुटाभिधः इतीदं पर
मं तत्त्वं रहस्यं देवदुर्लभं तव स्नेहेन निर्णीतं गो
पनीयं मुमुक्षुभिः इति श्रीदेवीरहस्ये तन्त्रे संपु
टविधिर्नाम नवमः पटलः भैरव: अधुना।
देवि वक्ष्येहं पुरश्चरण साधनं येन साधित
मात्रेण मन्त्रः सिद्धिप्रदो भवेत् जीवहीनो य।

दे॰ र॰ २७

यादेही सर्वकर्मसुनक्षत्रमः पुरश्चरणहीनोपि
नमन्त्रः सिद्धिदायकः वर्णलक्षं जपेन्मन्त्रं तद
र्धं वा महेश्वरि एकलक्षावधिं वापि कुर्यान्मन्त्री
न्यूनं कदाचन वटेरण्ये श्मशाने च शून्यागारे
चतुष्पथे अर्धरात्रेपि मध्याह्ने पुरश्चरणमा
रभेत् सुदिने शुभनक्षत्रे सुमुहूर्ते महेश्वरि।
सद्गुरुं पूजयित्वादौ पुरश्चर्यां समारभेत्।
गुरोराज्ञां समादाय स्नात्वा वेदीवरे सुधीः व
तुष्कोणमीशदेशे सुहस्तपरिविस्तृतां तत्र।
लिख्यां महादेवि सिन्दूरेण सुगन्धकैः लिखे
द्विन्दुत्रयं मादौ षट्कोणं वृत्तमण्डलम् वसु
पत्रारवृत्ताढ्यं भूगृहेणोपशोभितम् पुर
श्चर्यायस्त्रमेतदुदितं गिरिजे मया सर्वसाधा
रणं पूजं साधकैस्तत्त्वदर्शिभिः इन्द्राग्नि
यमनैऋत्यवरुणानिलवित्तपाः सेश्वराः लरप
दाग्रपमहं वीजमण्डिताः पूज्याः महेतपो
देविधरामवनमण्डले ब्राह्मीचवैष्णवीरौद्री
वी २७

कौमारी नारसिंहिका वाराही चण्डिका देवी पूज
नीयापराजिता सुभैरवा वसुदले वामावृर्तैसुम
न्नुभिः पार्वती कुब्जिका दुर्गा चामुण्डा नीलतारि
णी कात्यायनी पूजनीया षडस्रे शुभतुरैः गंगा
च यमुना चैव पूज्यात्र्यस्रे महेश्वरि पूज्या च मशि
वा विन्दौ साधकैरिष्टदेवता मूलमन्त्रेण गन्धा
द्यैष्य पूधूपादिदीपकैः तत्र विन्दौ न्यसेद्यन्त्रं
स्वेष्टदेव्या महेश्वरि वेदी विदिक्षु संस्थाप्य मन्त्री
घटचतुष्टयं मूलेन साधको देवि पवास्तं मन्त्र्य
वापयेत् वह्निनिर्ऋतिवाते शक्र मेणैवं समर्चयेत्
गणेशं भारती दुर्गां क्षेत्रपालं घटेषु च स्वरयन्मू
लेन देवेशि तन्त्र पूजां तथाह्निकीम् कुर्यात्तदग्र
तो देवि डरक्षरणमारभेत् श्रीकूर्चं पूजयित्वा
दौ तत्रः कुर्याज्जपं सुधीः शान्तो दान्तं तथा लौल्यं
त्यक्त्वे मन्त्रस्य सिद्धये ब्रह्मचर्यधरो मन्त्री ध्या
येद्देवीं वरप्रदाम् जपेन्मूलं वशं लक्षे नियमेन

२०

दे. र. २८ समाहितः हविष्याशी महादेवि ततः सिद्धिर
न्तमाज स्नाम त्रीमन्त्रराजं कृत्वा देवि दशांशतः
तर्पयेत्तद्दशांशेन मार्जयेत्तद्दशांशतः भोजये
त्तद्दशांशेन मन्त्रसिद्धिर्भवेद्ध्रुवम् अथवान्य
प्रकारेण पुरश्चरमिष्यते रात्रौ परस्त्रियं वा
लास्यामां वामदनातुरो आनीय जजयेन्मन्त्री
यथोक्तविधिना शिवे नग्नो मुक्तकचो धीरो मधु
पानपरायणः शक्तिवक्त्रः समाश्लिष्टो जपेन्मू
लं यथाविधि लक्षमेकं दशांशेन संस्कृतो हो
मतर्पणैः मन्त्रसिद्धिर्भवेत्तस्य देवानामपि दुर्ल
भा अथवान्यप्रकारेण पुरश्चरणमिष्यते पुत्र
जन्मोत्सवदिने सूतिकाकुलमन्दिरे मान्त्रिको
मूलमन्त्रं स्वं जपेद्दशदिनावधि दशांशं संस्कृ
तो मन्त्रं कुर्यात्सिद्धो भवेन्मनुः अथवान्यप्रका
५ रेण पुरश्चरणमिष्यते मृतकाशौचदिवसे प्र
थमे साधको जपेत् मन्त्रं वशी दिने रात्रौ वीरो
भूत्वा यथार्थतः एकादशेऽहनि सुधीः कुर्या
न्मन्त्रं तु संस्कृतं कर्मणा मनसा वाचा मन्त्रः क

स्तम्भो भवेत् अथवाऽन्यप्रकारेण पुरश्चरणमिष्यते सूर्योदयात्समारभ्य यावत्सूर्योदयान्तरम् तावज्जप्त्वा निरातंको मन्त्रः कस्तम्भो भवेत् अथवान्यप्रकारेण पुरश्चरणमिष्यते सूर्योपरागवेलायां जपेन्मन्त्रं महेश्वरि जप्त्वा होमादिकं कृत्वा मन्त्रसिद्धिर्भवेद्ध्रुवम् अथवान्यप्रकारेण पुरश्चरणमिष्यते चन्द्रोपरागे देवेशि जपेन्मूलं यथाविधि दशांशं संस्कृतो मन्त्री भवेच्चिन्तामणिः क्षणात् यस्य नास्ति जपे शक्तिः पञ्चरत्नेश्वरीं जपेत् वर्णलक्षं पुरश्चर्याः फलमाप्नोति साधकः इदं तत्त्वं हि मन्त्राणां सारात्सारं परात्परम् अवाच्यं गुह्यमीशानि गोपनीयं मुमुक्षुभिः इति देवीरहस्ये तन्त्रे पुरश्च[illegible]र्याविधिर्नाम दशमः पटलः १० भैरवः अथ नादे विवक्ष्येहं पुरश्चर्याः फलं परम् येन कृत्वा साधको देवि मन्त्रोप्यमरतां लभेत् श्रीदेवी भगवन् त्वत्तो ज्ञातं सकलागमपारग: शुद्दिनेऽभ

२. नक्तत्रे साधको भैरवा ने गृहीतः होमसंभारं
२. व्रजेत्स्वयतमानसः तत्रैकतः श्मशाने तु धृत्वास
२२ मुरवपृष्ठयोः रोशम्यां दिशि देवि शिलिखेत्स्त्री
चक्रमुत्तमम् तत्समन्यविधिना श्रीचक्रं मू
लविद्यया ततो मत्रं जपेत्सिद्धमष्टोत्तरशताव
धि पूर्वस्यां दिशि संयत्रात्मवनैकं भं त्रिकोणकं
हस्तैकविस्तृतं चाधो हस्तैकपरिमाणतः कुण्डे
स्मिन्विलिखेद्यत्रं तुम्रविन्दुविराजितम् षट्को
णमष्टपत्रं च त्रिवृत्तं भूगृहं कितं ततः पूजां चरेद्दे
वि कुण्डचक्रस्य पार्वति यथोक्तविधिना येन सा
धको दीक्षितो भवेत् गणेशधर्मवरुणः कुवेर
सहितास्तु याचतुर्द्वारेषु संपूज्याः चतुरो द्वारपा
लकाः मायाच मोहिनी माता माधवी वह्निवह्निभा
वतुली वीरभूवी भ्या पूज्या अष्टदलास्थिताः ब्रह्मा
लिकां [illegible] ब्रावगलाछिन्नशीर्षाम्बिकाभगाः षट्को
णमध्यगा पूज्याः कुण्डचक्रे महेश्वरि वह्निं वैश्वा
नरं चाग्निं त्रिकोणे पूजयेच्छिवे स्वाहां भगवतीम्वि

न्दौजातवेदं समर्चयेत् अग्निमूलेन देवेशि वह्नेर्द
शकलान्वितः तारं वह्निः शिवो विश्व ह्रुं शक्तिमहे
श्वरि अग्ने वैश्वानरं ब्रूयाज्जाभारेति संवदेत् भा
सुरे तित्रिनेत्रेति ज्वालामुखं पदं वदेत् प्रज्वलेति
युगं ब्रूयाज्जातवेदसि संवदेत् ठद्वयं संवदेदनेम
न्त्रायं वह्निवक्त्रे भः अनेन मूलमन्त्रेण वह्निरक्तं प्रपू
जयेत् गंधाक्षतप्रसूनैश्च धूपदीपादितर्पणैः
नैवेद्याचमनीयाद्यैस्ताम्बूलैश्च सुवासितैः तत्रसं
पूज्य देवेशि श्रीचक्रं नवयोनिकम् ततोदिग्भैर ।
ने वान् तानर्चयेत् कुसुमैः परम् ततो देवि प्रमध्या
ग्निकुण्डचक्रे कुलेश्वरि विन्दौ वह्निं समावाह्य मू
लेनोज्वलयेच्छिवे अग्निं सन्दीप्य मूलेन प्राण
मे वाह्निमुद्रया मूलेनाहुतिभिर्वह्निं हुने त्वोडश
भिस्ततः अष्टोत्तरशतावृत्त्या दाज्येन पार्वति । हुने
आहुतिः पायसैर्देवि मद्वीकागुरुपुष्पकैः म
भः= त्स्याण्डचर्करान्नैः कस्तूरीदृशदंकितैः ततोज
प्तामहाविद्यां साधकान्नूजयेच्छिवे पञ्चवान् ।

दे॰ र॰ ३०

वचाचेतितथैकादशवाशिवे कुलीनान्धार्मिकान्
शुद्धान्दीक्षितान्वाप्यदीक्षितान् दृढव्रतान्छु
भाचारान्देविभक्तिरतांस्तथा वैरवानिरिजे
शैवान्गुरुभक्तिपरायणात् तत्रसम्पूज्यविधि
वज्ज्ञात्वाभैरवसन्निभान् पाद्यार्घमधु[?]कीद्ये
र्गन्धाक्षतसुपुष्पकैः तान्संपूज्यमहादेविदशांशं
होममाचरेत् श्रीदेवीभगवन्देवदेवेशतन्त्रत
परमेश्वर कुलसाधकपूजायां संशयंछेत्तुम
र्हसि तत्रपूजाविधौदेवसर्वेपूज्याद्विजोत्तमाः
अथवाक्षत्रियावैश्याः शूद्रावावदविस्तरात्॥
भैरवः प्रवृत्तेभैरवेतत्रैसर्वेवर्णाः पृथक्पृथक्
सर्वदाशिवचक्रेस्मिन्संप्रदायोयमीरितः नपुर
श्चरणाचार्यो तत्रसर्वेद्विजोत्तमाः एकस्तुक्ष
त्रियः पुण्यादातावैरवसन्निभः दृढव्रतः।
शुभाचारः कुलीनः शिवपूजकः शक्तः परम
भक्तश्चकुलचक्रेनिगंत्पते तत्रहोमंचसंपा।

सर्वेवर्णा द्विजोत्तमाः भिन्न
भैरवेतंत्रे ×

यदद्यान्नैवेद्यमादरात् कुलचक्रगतान्देवि ब्राह्म
णान्साधकोत्तमान् पूजयेत्क्षत्रियो वीरो भक्तिश्र
द्धासमन्वितः गन्धाक्षतैस्तु पुष्पैश्च धूपदीपादि
भिः शिवे नैवेद्याचमनीयाद्यैर्भक्ष्यैर्भोज्यैश्च ले
ह्यकैः सन्तर्प्य साधकान्देवि परमानन्दसेवितः।
साधकः क्षत्रियं वीरं दातारं वीरसेवकम् आशी
र्भिर्वर्धयेद्देवि प्रणमेत्त्रिपुराम्बिकाम् कुलचक्र।
गतो वीरः कुलचक्रप्रपूजकः सर्वे ते कुलदेव्यन्ते
यान्ति शीघ्रं कुलालयम् क्षत्रियोपि महादेवि कु
लमंगाकुलार्घतित् सर्वपापविनिर्मुक्तः सर्वसि
द्धिसमन्वितः इहलोके श्रियं प्राप्य भुक्त्वा भोगा
न्यथेप्सितान् परत्र परमेशानि मृतो देवपदं।
व्रजेत् एवं विधाय मन्त्री यो हं स जपफलाप्तये
पुरश्चर्याफलं देवि वर्णलक्षस्य सोश्नुते वर्ण
लक्षजपस्यैवं फलमाप्नोति कौलिकः सर्वे तत्र
स्थिता न त्वा श्मशानस्थं च भैरवं संहारमु।
द्रया देवी विसृज्य साशिवा शिवं सर्वे ते साधक

देः ३१ यश्चाभवेपुः कुलभागिनः इदंरहस्यं देवेशिम
त्यातवमयोदितं अप्रकाश्यमदातव्यमित्याज्ञा
पारमेश्वरी इतिश्रीरुद्रयामलेतन्त्रे श्रीदेवीर
हस्येपुरश्चर्याहोमविधिर्नामेकादशःपट
लः ११ भैरवः शृणुदेविप्रवक्ष्यामिरहस्यं सर्वस्व
मुत्तमम् श्रीचक्रनिर्णयंनामपटलंदेवदुर्लभम्
देवीनांपरमप्रीत्यायन्त्रोद्धारंब्रवीम्यहं यस्यकस्य
नवक्तव्यं गोपनीयंविशेषतः त्रयस्त्रिंशतिदेवा
नांकोटयःसुमहेश्वरि देवीनांचतथादेवित्र
यस्त्रिंशतिकोटयः तासांमध्येप्रधानाःस्युः
त्रयस्त्रिंशतिदेवताः पूर्वोक्तायामहादेवितां
सांयन्त्रोत्तमंशृणु अथवक्ष्येतवप्रीत्यावाला
यन्त्रंमहेश्वरि सर्वार्थसाधकंदेविसर्वाशाप
रिपूरकम् विन्दुस्त्रिकोणरसकोणकनागय
त्रवृत्तत्रयाश्रितमहीसदनेत्रयंच वालादिच
क्रमिदमार्जिहरंगिरीशवक्षेद्रुवाङ्मुननमितां
गादितेमयाते १ अथत्रिपुरभैरव्यायन्त्रोद्धारं ३१

ब्रवीम्यहं सकलागमसाराढ्यं मापदुद्धरएद्ध
मे विन्दुस्त्र्यस्त्रं नागकोएं दशारं वृत्तं चितं वसुपत्रं
कलारं वृत्तत्रयं भनिकेतत्रये च श्रीचक्रं वर्णितं मे
रवीयं २ अथो त्रिपुरसुन्दर्या वक्ष्ये श्रीचक्रनिर्ण
यं सर्वसम्मोहनं देवि सर्वसिद्धिप्रवर्तकं अ
स्ये मध्यगत त्रिकोएसहितं दिग्दन्तिकोएांकितं
विंशारं मनुमिश्रितं करिदलं श्रीषोडशारांचि
तं स वृत्तत्रय संयुतं च धरणीगेहांकितं त्रैपुरं
मत्राभीष्ट फलप्रदं कलियुगे श्रीचक्रमुद्योत
ते बिन्दु त्रिकोए वसुकोए दशार युग्म मन्वस्त्र
नागदल संगत षोडशारं वृत्तत्रयं च धरणीस
दन त्रयं च श्रीचक्रमेतदुदितं परदेवतायाः ३
अथाहं कालिकायास्तोयन्त्रोद्धारं ब्रवीम्यहं स
र्वार्थसिद्धिदे लोके सर्वकामप्रपूरकं त्रिकोएस्यं
अ सं तदुपविंशार कोएसहितं त्रिकोएं षट्को २
एां भगवति वृत्तं वसुदलं त्रिवृत्तं तद्बाह्यो दिति
भवनयुक्तं च जयतामिदं श्यामायन्त्रं मरएाभ

28

दे॰ यवर्गप्रथमं नं ४ अथाहं भद्रकाल्यास्तैर्यन्त्रोद्धारं
२॰ सुरप्रियं ब्रवीमि दयया देवि सर्वसारतरप्रदम् ।
३२ मध्ये तुर्यवरं स्वमण्डलयुतं द्विरसप्रकारांकितं ।
द्विसूर्यारयुतं चतुर्गुणचतुष्पत्रावलीशोभितं ।
सद्वृत्तत्रयमण्डितं वहिरिलागेहत्रयोद्भासितं तं
याद्यन्त्रमिदं यथेष्टफलदं भे भद्रकालीप्रियं ५
अथ वक्ष्यामि मातंग्या यन्त्रं तन्त्रविनिश्चितं दे
विदेवैर्न धप्रीत्या न चान्यत्र प्रकाशयेत् विन्दुस्त्रि
कोणं वसुकोणयुक्तं वृत्तं ततो नागदलं त्रिवृत्तं भूम
न्दिरं पार्वति वहिरे रवं मातंगिनीयन्त्रमिदं प्रदिष्टं
६ अथाहं भुवनेश्वर्या यन्त्रोद्धारं ब्रवीमि ते प्रीत्या
भक्त्या महेशानि न चाख्येयं महात्मभिः विन्दु
स्त्रिकोणं रसकोणसंयुतं वृत्तं चितं नागदलेन म
ण्डितं कलारवृत्तत्रयभूगृहान्तिकं श्रीचक्रमेत
द्भुवनेश्वरीप्रियं ७ अथ वक्ष्यामि तारायायन्त्रोद्धा
रमनुत्तमं भोगमोक्षप्रदं देवि गोप्यं कुरुस्महे

श्वरि विन्दुस्त्रिकोणं च षडस्रयुक्तं वृत्तं तथाष्टार
मलं त्रिवृत्तं सभूपरं चैकजटाविलासगेहं मया
यन्त्रमिदं प्रदिष्टं ८ अथाहं भिन्नमस्तायायन्त्रोद्धार
मनुत्तमं प्रवक्ष्यामि तव प्रीत्यानवकुंभमुत्तमुनुभि:
विन्दुस्त्रिकोणं च वह्निस्त्रिकोणं त्रिकोणमूर्ध्वमुभ
वृत्तं विंशं वसवग्रयुक्तं धरणीगृहे स्याच्छ्रीचक्रमे
तत्परदेवतायाः ९ अथ वक्ष्यामि तेऽन्ययन्त्रोद्धारं द
महेश्वरि सुमुखाः सारसर्वस्वं नन्दे यंत्रं सवादिभि:
विन्दुं वानलकोणगं च विलिखेद्वाणास्रकोणं त्रिवृत्तं
वृत्तं नागदलेन मण्डितमथो श्रीखंडशारांकितं सद्वृ
त्तं त्र्यस्रसंयुतं च धरणीगेहांकितं पार्वति श्रीचक्रं सु अ
खीप्रियं विजयतां द्रोणापवर्गप्रदे १० अथ वक्ष्यामि तस्तं
तेयायन्त्रोद्धारं महेश्वरि सरस्वत्याः कौलिकानां भुक्तिमु
क्तिफलप्रदं त्रिकोणं सविन्दुं ततः षट्कोणं सवृत्तं त
तो नागपत्रं त्रिवृत्तं धरान्दिरं वह्निरेखोज्ज्वलं नमयो म
कं हि सारस्वतं यन्त्रमेतत् ११ अथाहं मन्त्रपूर्णीयय
न्त्रराजं ब्रवीम्यहं सर्वसंमोहनं देवि सर्वभोगैकसाध
नम् त्रिकोणं रसारं त्रिकोणं त्रिकोणं त्रिकोणं त्रिकोणं

दे० र० ३३ त्रिकोणं हि वृत्तं ततो नागपत्रांचितं वाग्निवृत्तं धरा
मन्दिरं चान्त्र पूर्णेष्टुचक्रम् १२ अथ पवक्ष्ये शिवे यन्त्रेम
हालक्ष्म्याः परात्परं यमभ्यर्च्य मयाप्राप्तं दुर्लभं
परमंपदम् एवं व्याहृतं चकारसहितं वृत्तव
हिः अोभनं वाह्ये नागदलंकरालविलसद्वृत्तत्रयो
द्भासितं भूगेहत्रयशोभितं नवमयानि लीनमेतन्म
रं श्रीचक्रं परमार्थदायि च महालक्ष्मीप्रियं सिद्धि
दं १३ यन्त्रोद्धारं प्रवक्ष्यामि साधकानां कृपावहे ।
शारिकाया महादेवि लीलालयलयाकुलं एवत्रिको
णवसुकोणसुवृत्तोद्योतनागदलवृत्तं महालं भूगे
हं शिखिरवीन्दुसाङ्क्षितं यन्त्रमेतदुदितं शिवालयं १४
यन्त्रोद्धारं महादेवि शारदाया ब्रुवीम्यहम् सर्वार्थ
साधकं चक्रं सर्वकामप्रपूरकं मध्ये विन्दुस्ततो वहिः
८ स्यात्त्रिकोणं षट्कोणं स्यात्तु वसु अष्टकं वृत्ताकारं षो
डशारं त्रिवृत्तं भूगेहं स्याच्छारदायन्त्रमेतत् १५ अ
थाहं ते प्रवक्ष्यामि यन्त्रोद्धारं सुदुर्लभं इन्द्राक्ष्यास्त
त्सर्वस्वं त्रिषु लोकेषु गोपितं विन्दुस्त्रिकोणं षडु
स्त्र षडस्र उर्ध्व षट्कोणवृत्तं वसुपत्रकलास्त्रमिश्रं ३३

भूगेहविंभमनलेन शशिप्रभाभं इन्द्राक्षिणीप्रि
यतरंजयचक्रमेतत् १६ अथ तेवगलामुख्या
यन्त्रोद्धारं ब्रवीम्यहं सर्वसिद्धिप्रदं देवि गोपनी
यं प्रयत्नतः विन्दुस्त्रिकोणं चरसारवृत्तं वसुपत्र
वृत्तान्वितषोडशारं वृत्तत्रयं भूसदनत्रयं च श्री
चक्रमेतद्वगलामुखीयं १७ अथाहं ते महानु
र्यो यन्त्रोद्धारमनुत्तमं ब्रवीमि परमप्रीत्या सक
लाभीष्टसाधनम् विन्दुस्त्रिकोणं नवयोनि पु
नं वृत्ताश्रितं नागदलं त्रिवृत्तं धराग्रहं वह्नि नु
टीभिरीहं तु यालयं चक्रमिदं प्रदिष्टं १८ यन्त्रो
द्धारं प्रवक्ष्यामि सर्वाशापरिपूरकं सर्वार्थसाध
कं चक्रं सर्वसम्मोहनं तथा विन्दुस्त्र्यस्रं षडस्रं च
वृत्ताष्टदलमण्डितं वृत्तत्रयं धरासद्म राज्ञी
श्रीचक्रमितितं २२ अथ यन्त्रवरं वक्ष्ये ज्वालामुख्या
महेश्वरि सर्वतन्त्रैकनिलयं सर्ववाञ्छितदाय
कं मध्ये भूमं तदुपरि शरत्कोणमालिख्य दे
वि तत्राधस्तात्त्रिकमपवहिर्दिग्दलं वृत्तमेकं
वसुपत्रैर्द्विः कदलजशरवृत्तभूगेहयुक्तं ज्वाला।

दे. मुख्या जगति जयता च्चक्रमेतन्महेशि २० अथ
र. वक्ष्यामि देवेशि भीडायन्त्रमनुत्तमं सर्वागमरह
३४ स्याढ्यं सर्वसारस्वतप्रदम् विन्दुस्त्र्यस्रं काष्टामि
स्रं सुवृत्तं वस्वस्रं स्यात् द्विहिः षोडशारं वृत्तत्रयं भू
ध्यं= मिगेहत्रयाढ्यं भीडायन्त्रं सर्वसिद्धिप्रदं स्यात् २१
अथ वक्ष्यामि देवेशि कालरात्र्याख्यमनुत्तमं य
न्त्रोद्धारं परानन्दसाधनैकरसायनं विन्दुस्त्रि
कोणारसकोण सुवृत्तनागपत्रं कलारविलसद्
हनेरु वृत्तं भूमन्दिर यंत्रमिदं गिरिपुत्रियन्त्रं श्री
कालरात्रिनिलयं परमार्थदं स्यात् २२ अथाहं ते
प्रवक्ष्यामि भवान्या यन्त्रमनुत्तमं मूलमन्त्ररहस्या
ढ्यं सर्वसिद्धिप्रदायकं विन्दुस्त्रिकोणं च षडस्र
युक्तं वृत्तं च नागारकलादलाढ्यं वृत्तत्रयं भूसदन
त्रयं च श्रीचक्रमानन्दपरं भवान्याः २३ अथ व
क्ष्ये महादेवि यन्त्रराजं सुदुर्लभं श्रीवज्रयोगिनी
देव्याः सर्वसौख्यप्रवर्धनम् विन्दुस्त्रिकोणं च व
हिः षडस्रं वृत्तैकवस्वस्ररवृत्तयुक्तं धरागृहे ।

१

ॐ श्रीगणेशाय नमः ॥ यज्ञेमो दमस्तरः प्रथममार्य्या
णां परमेश्वरज्ञानेनासीत्पुनः क्रमाज्ज्ञातमिति तत्
सत्यम् निष्कामकर्म्मोपासनाज्ञानैकान्तःकरण द्वार
शुद्ध्युत्तरमेव शुद्धबुद्धमुक्तसत्यस्वभावब्रह्मणो वि
धस्य तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति य
ज्ञेन दानेन तपसानाशकेनेत्यादिश्रुतिभिः प्रतिपा
दनात् उपेयप्राप्तेरुपायसाध्यत्वेनेश्वरयथार्थज्ञा
मवेकर्मज्ञानस्यैवोपायभूतत्वात् अन्नमयाद्य
तन्निरस्य ब्रह्मपुच्छं प्रतिष्ठेत्यनेन सर्वावधिभूतस्य
ब्रह्मणो शेषमेमाधिष्ठानस्य निरूपणात् ॥
॥ यजुःसरावच्छन्दोरूपवेदस्यास्यैकत्रिंशच्छतव
र्गाण्यतीतान्येकोनत्रिंशच्छतवर्गाणमन्त्रात्मकवे
दोस्यज्ञा वितिसिद्ध्यर्थमवयति हिरण्यगर्भः समवर्त्तता गx
ग्र इति श्रुतिः पूर्वैमिर्ऋषिभिरितिश्रुतीं तत्र प्रमाण च
यति ॥ तन्नसमञ्जसम् एतन्मन्त्रार्थापरिज्ञानात् ॥
यजुर्दयानन्दः हिरण्यं ज्ञानं गर्भः स्वरूपं यस्य सूर्ये
न्द्रादिलोकाः यशो धन्यवादश्रुजीवश्च हिरण्यशब्दवा
च्या गर्भे सामर्थ्यं यस्य स हिरण्यगर्भः परमेश्वर इति तत्र
त्यं हिरण्यगर्भपदं व्याचष्टे ॥ तदसत् गर्भशब्दस्य स्व
रूपे सामर्थ्ये चाशक्तत्वात् सामर्थ्यं समर्थनिष्ठं ध
र्म्मात्मके जीवस्य सूर्यादेश्चावस्थितेर्वक्तुमशक्यत्वाच्च
तस्मात् हिरण्यं ज्योतिः सूर्यो गर्भेन्तर्यस्य विराड्रूप

समस्ति हिरण्यगर्भोऽग्रे ज्योति व्याख्येयम् प्रकरणप्राप्तत्वा
(यत्र अहमेवेद्यो न भूवेभवामि भविष्यामि चेत्यत्र व
भवेद्इति सप्रयुक्ते तदशुद्धम् भवतोः समार्थकस्यात्मने
पदित्वाभावात्) तत्र निरुक्तं प्रमाणमस्ति तद्य
कृतीतरद्वन्तेन सामान्यादित्ययं मन्त्रार्थो भूत् हो भूदे
प्रभृति तस्तर्क तो न तु पृथक्त्वेन मन्त्रा निर्वक्तव्याः प्र
करणशः एव तु निर्वक्तव्याः न ह्येषु प्रत्यक्षमस्त्यन्
षेरतपसो वा पारोवर्य्यवित्सु तु खलु वेदितृषु भू
यो विद्यः प्रशस्यो भवतीत्युक्तम् पुरस्तान्मनुष्या
वा ऋषिषूत्क्रामत्सु देवानब्रुवन्को न ऋषिर्भविष्य
तीति तेभ्य एतं तर्कमृषिं प्रायच्छन् मन्त्रार्थचिन्ता
भ्यूहमभ्यूढं तस्माद्यदेव किंचानूचानोऽभ्यूह
त्यार्षं तद्भवति नि० अ० १३ खं० १२ अस्याभिप्रायस्तु
न [illegible] वृत्तिसामान्येन मन्त्राणामर्थः पृथ
किन्तु क्कर्कल्पनीयः प्रकरणानुरोधेनैवेति –
यत्र अहमेवेद्यो न भूवेभवामि भविष्यामि चेत्यत्र व
भवेद् इति सप्रयुक्ते तदशुद्धम् समार्थकस्य भवतेरा
त्मनेपदित्वाभावात् ॥
यत्र कारणस्थैः कार्य्यद्रव्यस्थैः प्राणैः सहैव समा
धियोगेनेश्वरईड्य इति तैरुच्यते तदसाधु [illegible]
[illegible] अग्निः पूर्वेभिरिति मन्त्रव्याख्याया[illegible]
मुक्तत्वादिति –
एवं च इतरेतरम् विशेष्यविशेषणतया सामान्यवृत्तौ
वर्त्तमानानां मन्त्राणामर्थीस्त्वानचितेत्यादिप्रया तद्कृतविवर
णनिरसंवादितमेव वाक्यस्य [illegible] ८

प्रकरणम् अनेन तर्क मात्रेण च

छन्दांसि वै देवा वयोनाधाश्छन्दोभिर्हीदं सर्वं वयु पृ४
नं नद्धम् श० कां० ८ अ० २ । एता वै देवता छन्दांसि श०
कां० ८ अ० २ । एतेन श्रुतौ वेदस्य देवतास्वरूपज्ञानं तत्
साधनत्वेन देवताभावं वदतः गायत्री वा इदं
सर्वमित्योमित्येतदक्षरमुद्गीथमुपासीतेति छान्दो
ग्योपनिषदुक्तश्रुतिभ्यां गायत्रीप्रणवयोरीश्वरस्व
त रूपज्ञानतत्साधनं यात् स्फुटं निरूपणेन तत्-
णेन सर्वविद्याद्योतकत्वाच्छन्दांसि देवताशब्देन ग्रह
णम् इति निरस्तम्

अथ कोऽयं वेदो नाम मन्त्रभागसंहितेत्याह ब्राह्मण
भागस्य न वेदसंज्ञा पुराणेतिहाससंज्ञकत्वाद् वेदव्या
ख्यानादृषिभिरुक्तत्वादनीश्वरोक्तत्वात् कात्यायन
